# sharaNAgati dIpikA

# શરણાગતિ દીપિકા

## Document Information

Text title : sharaNAgatidIpikA

File name : sharaNAgatidIpikA.itx

Category : major_works, vedAnta-deshika, vedanta

Location : doc_z_misc_major_works

Author : vedAntadeshika

Source : Stotras of Vedanta Desika

Latest update : October 2, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 17, 2024

*sanskritdocuments.org*

sharaNAgati dIpikA

# શરણાગતિ દીપિકા

શ્રીઃ ॥

શ્રીમાન્ વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

પદ્માપતેઃ સ્તુતિપદેન વિપચ્યમાનં
પશ્યન્ત્વિહ પ્રપદનપ્રવણા મહાન્તઃ ।
મદ્વાક્ય સંવલિતમપ્યજહત્સ્વભાવં
માન્યં યતીશ્વરમહાનસસમ્પ્રદાયમ્ ॥ ૧॥

નિત્યં શ્રિયા વસુધયા ચ નિષેવ્યમાણં
નિર્વ્યાજનિર્ભરદયાભરિતં વિભાતિ ।
વેદાન્તવેદ્યમિહ વેગવતી સમીપે
દીપપ્રકાશ ઇતિ દૈવતમદ્વિતીયમ્ ॥ ૨॥

દીપસ્ત્વમેવ જગતાં દયિતા રુચિસ્તે
દીર્ઘં તમઃ પ્રતિનિવર્ત્યમિદં યુવાભ્યામ્।
સ્તવ્યં સ્તવપ્રિયમતઃ શરણોક્તિવશ્યં var સ્તવપ્રિયતમં
સ્તોતું ભવન્તમભિલષ્યતિ જન્તુરેષઃ ॥ ૩॥ var ભવન્તમિહ વાઞ્છતિ, ભવન્તમભિવાઞ્છતિ

પદ્માકરાદુપગતા પરિષસ્વજે ત્વાં
વેગા સરિદ્વિહરણા કલશાબ્ધિકન્યા ।
આહુસ્તદાપ્રભૃતિ દીપસમાવભાસં
આજાનતો મરકતપ્રતિમં વપુસ્તે ॥ ૪॥

સ્વામિન્ ગભીરસુભગં શ્રમહારિ પુંસાં
માધુર્યરમ્યમનઘં મણિભઙ્ગદૃશ્યમ્ ।
વેગાન્તરે વિતનુતે પ્રતિબિમ્બશોભાં var વેગાન્તરેઽપિ તનુતે
લક્ષ્મી સરઃ સરસિજાશ્રયમઙ્ગકં તે ॥ ૫॥

આવિશ્ય ધારયસિ વિશ્વમમુષ્ય યન્તા
શેષી શ્રિયઃપતિરશેષતનુર્નિદાનમ્ ।
ઇત્યાદિ લક્ષણગણૈઃ પુરુષોત્તમં ત્વાં
જાનાતિ યો જગતિ સર્વવિદેષ ગીતઃ ॥ ૬॥

વિશ્વં શુભાશ્રયવદીશ વપુસ્ત્વદીયં
સર્વા ગિરસ્ત્વયિ પતન્તિ તતોઽસિ સર્વઃ ।
સર્વં ચ વેદવિધયસ્ત્વદનુગ્રહાર્થાઃ
સર્વાધિકસ્ત્વમિતિ તત્ત્વવિદસ્તદાહુઃ ॥ ૭॥

જ્ઞાનં બલં નિયમનક્ષમતાઽથ વીર્યં
શક્તિશ્ચ તેજ ઇતિ તે ગુણષટ્કમાદ્યમ્ ।
સર્વાતિશાયિનિ હિમોપવનેશ યસ્મિન્
અન્તર્ગતો જગદિવ ત્વયિ સદ્ગુણૌઘઃ ॥ ૮॥

દીપાવભાસદયયા વિધિપૂર્વમેતત્
વિશ્વં વિધાય નિગમાનપિ દત્તવન્તમ્ ।
શિષ્યાયિતાઃ શરણયન્તિ મુમુક્ષવસ્ત્વાં
આદ્યં ગુરું ગુરુપરમ્પરયાઽધિગમ્યમ્ ॥ ૯॥ var ગુરુપરમ્પરયાઽભિગમ્યમ્

સત્તા સ્થિતિ પ્રયતનપ્રમુખૈરુપાત્તમ્
સ્વાર્થં સદૈવ ભવતા સ્વયમેવ વિશ્વમ્ ।
દીપપ્રકાશ તદિહ ત્વદવાપ્તયે ત્વાં
અવ્યાજસિદ્ધમનપાયમુપાયમાહુઃ ॥ ૧૦॥

ભોગ્યં મુકુન્દ ગુણભેદમચેતનેષુ
ભોક્તૃત્વમાત્મનિ નિવેશ્ય નિજેચ્છયૈવ । var ભોક્તૃત્વમાત્મસુ
પાઞ્ચાલિકાશુકવિભૂષણભોગદાયી
var પાઞ્ચાલિકાંશુકવિભીષણ, પાઞ્ચાલિકાંશુકવિભૂષણ
સમ્રાડિવાત્મસમયા સહ મોદસે ત્વમ્ ॥ ૧૧॥

ત્વાં માતરં ચ પિતરં સહજં નિવાસં
સન્તઃ સમેત્ય શરણં સુહૃદં ગતિં ચ ।
નિઃસીમનિત્યનિરવદ્યસુખપ્રકાશં
દીપપ્રકાશસવિભૂતિગુણં વિશન્તિ ॥ ૧૨॥

જન્તોરમુષ્ય જનને વિધિ શમ્ભુ દૃષ્ટૌ

રાગાદિનેવ રજસા તમસા ચ યોગઃ ।
દ્વૈપાયનપ્રભૃતયસ્ત્વદવેક્ષિતાનાં
સત્ત્વં વિમુક્તિ નિયતં ભવતીત્યુશન્તિ ॥ ૧૩ ॥

કર્મસ્વનાદિ વિષમેષુ સમો દયાલુઃ
સ્વેનૈવ ક્લૃપ્તમપદેશમવેક્ષમાણઃ । var ક્લૃપ્તમુપદેશમપેક્ષમાણઃ
સ્વપ્રાપ્તયે તનુભૃતાં ત્વરસે મુકુન્દ
સ્વાભાવિકં તવ સુહૃત્ત્વમિદં ગૃણન્તિ ॥ ૧૪ ॥

નિદ્રાયિતાન્ નિગમવર્ત્મનિ ચારુદર્શી var ચોરદર્શી, પારદર્શી
પ્રસ્થાનશક્તિસહિતાન્ પ્રતિબોધ્ય જન્તૂન્ । var રહિતાન્
જીર્ણ સ્તનન્ધયજડાન્ધમુખાનિવાસ્માન્ var મુખાનિવાન્યાન્
નેતું મુકુન્દ યતસે દયયા સહ ત્વમ્ ॥ ૧૫ ॥ var સહત્વમ્

ભક્તિઃ પ્રપત્તિરથવા ભગવંસ્તદુક્તિઃ
તન્નિષ્ઠ સંશ્રય ઇતીવ વિકલ્પ્યમાનમ્ ।
યં કંચિદેકમુપપાદયતા ત્વયૈવ var યત્કિંચિત્
ત્રાતાસ્તરન્ત્યવસરે ભવિનો ભવાબ્ધિમ્ ॥ ૧૬ ॥

નાનાવિધૈરકપટૈરજહત્સ્વભાવૈઃ
અપ્રાકૃતૈર્નિજવિહારવશેન સિદ્ધૈઃ ।
આત્મીયરક્ષણવિપક્ષવિનાશનાર્થૈઃ var વિનાશનાર્હૈઃ
સંસ્થાપયસ્યનઘ જન્મભિરાદ્યધર્મમ્ ॥ ૧૭ ॥

નિમ્નોન્નતાનિ નિખિલાનિ પદાનિ ગાઢં
મજ્જન્તિ તે મહિમ સાગરશીકરેષુ ।
નીરન્ધ્રમાશ્રયસિ નીચજનાંસ્તથાપિ
શીલેન હન્ત શિશિરોપવનેશ્વર ત્વમ્ ॥ ૧૮ ॥

કાશીવૃકાન્ધકશરાસનબાણગઙ્ગા-
સંભૂતિનામકૃતિસંવદનાદ્યુદન્તૈઃ । var સંવનનાદ્યુદન્તૈઃ
સ્વોક્ત્યમ્બરીષ ભયશાપમુખૈશ્ચ શમ્ભું
તન્નિઘ્નમીક્ષિતવતામિહ કઃ શરણ્યઃ ॥ ૧૯ ॥

ક્વાસૌ વિભુઃ ક્વ વયમિત્યુપસત્તિ ભીતાન્
જન્તૂન્ ક્ષણાત્ ત્વદનુવૃત્તિષુ યોગ્યયન્તી । var ત્વદનુભૂતિષુ
સંપ્રાપ્તસદ્ગુરુતનોઃ સમયે દયાલોઃ

આત્માવધિર્ભવતિ શિક્ષિતધીઃ ક્ષણં તે ॥ ૨૦॥   var  સંસ્કૃતધીઃ, સંસ્કૃતિરીક્ષણં તે

યોગ્યં યમૈશ્ચ નિયમૈશ્ચ વિધાય ચિત્તં
સન્તો જિતાસનતયા સ્વવશાસુ વર્ગાઃ ।
પ્રત્યાહૃતેન્દ્રિયગણાઃ સ્થિરધારણાસ્ત્વાં
ધ્યાત્વા સમાધિયુગલેન વિલોકયન્તિ ॥ ૨૧॥

પદ્માભિરામવદનેક્ષણપાણિપાદં
દિવ્યાયુધાભરણમાલ્ય્ વિલેપનં ત્વામ્ ।
યોગેન નાથ શુભમાશ્રયમાત્મવન્તઃ
સાલમ્બનેન પરિચિન્ત્ય ન યાન્તિ તૃપ્તિમ્ ॥ ૨૨॥   var  શાન્તિં

માનાતિલઙ્ઘિ સુખબોધમહામ્બુરાશૌ
મગ્નાસ્ત્રિસીમરહિતે ભવતઃ સ્વરૂપે ।
તાપત્રયેણ વિહતિં ન ભજન્તિ ભૂયઃ  var  સન્તઃ
સંસારધર્મજનિતેન સમાધિમન્તઃ ॥ ૨૩॥

ધીસંસ્કૃતાન્ વિદધતામિહ કર્મભેદાન્
શુદ્ધં જિતે મનસિ ચિન્તયતાં સ્વમેકમ્ ।
ત્વત્કર્મસક્તમનસામપિ ચાપરેષાં
સૂતે ફલાન્યભિમતાનિ ભવાન્ પ્રસન્નઃ ॥ ૨૪॥

ઉદ્બાહુભાવમપહાય યથૈવ ખર્વઃ
પ્રાંશું ફલાર્થમભિયાચતિ યોગિચિન્ત્ય ।
 var  પ્રાંશુ ફલં સમભિયાચતિ
એવં  સુદુષ્કરમુપાયગણં વિહાય
સ્થાને નિવેશયતિ તસ્ય વિચક્ષણસ્ત્વામ્ ॥ ૨૫॥   var  વિચક્ષણં

નિત્યાલસાર્હમભયં નિરપેક્ષમન્યૈઃ
વિશ્વાધિકારમખિલાભિમતપ્રસૂતિમ્ ।
શિક્ષાવિશેષસુભગં વ્યવસાય સિદ્ધાઃ   var  સુલભં
સત્કુર્વતે ત્વયિ મુકુન્દ ષડઙ્ગયોગમ્ ॥ ૨૬॥

ત્વત્પ્રાતિકૂલ્યવિમુખાઃ સ્ફુરદાનુકૂલ્યાઃ
કૃત્વા પુનઃ કૃપણતાં વિગતાતિશઙ્કાઃ ।
સ્વામિન્ ભવ સ્વયમુપાય ઇતીરયન્તઃ
ત્વય્યર્પયન્તિ નિજભારમપારશક્તૌ ॥ ૨૭॥

અર્થાન્તરેષુ વિમુખાન્ અધિકારહાનેઃ
શ્રદ્ધાધિકાંસ્ત્વદનુભૂતિ વિલમ્બભીતાન્ । var શ્રદ્ધાધનાત્
દીપ પ્રકાશ લભસે સુચિરાત્ કૃતીવ var કૃતી ત્વં
ન્યસ્તાત્મનસ્તવ પદે નિભૃતાન્ પ્રપન્નાન્ ॥ ૨૮॥

મન્ત્રૈરનુશ્રવમુખેષ્વધિગમ્યમાનૈઃ var અનુગમ્યમાનૈઃ
સ્વાધ્ ક્રિયાસમુચિતૈર્યદિવાઽન્યવાક્યૈઃ।
નાથ ત્વદીય ચરણૌ શરણં ગતાનાં
નૈવાયુતાયુતકલાપ્યઽપરૈરવાપ્યા ॥ ૨૯॥

દત્તાઃ પ્રજા જનકવત્ તવ દેશિકેન્દ્રૈઃ
પત્યાઽભિનન્દ્ય ભવતા પરિણીયમાનાઃ ।
મધ્યે સતાં મહિતભોગવિશેષસિદ્ધ્યૈ
માઙ્ગલ્યસૂત્રમિવ બિભ્રતિ કિઙ્કરત્વમ્ ॥ ૩૦॥ var મઙ્ગલ્યસૂત્રમિવ

દિવ્યે પદે નિયતકિઙ્કરતાધિરાજ્યં
દાતું ત્વદીય દયયા વિહિતાભિષેકાઃ ।
var પ્રાપ્તું ત્વયૈવ, દાતું ત્વયૈવ
આદેહપાતમનઘાઃ પરિચર્યયા તે
યુઞ્જાનચિન્ત્ય યુવરાજપદં ભજન્તિ ॥ ૩૧॥

ત્વાં પાઞ્ચરાત્રિકનયેન પૃથગ્વિધેન
વૈખાનસેન ચ પથા નિયતાધિકરાઃ ।
સંજ્ઞાવિશેષનિયમેન સમર્ચયન્તઃ
પ્રીત્યા નયન્તિ ફલવન્તિ દિનાનિ ધન્યાઃ ॥ ૩૨॥

વર્ણાશ્રમાદિનિયતક્રમસૂત્રબદ્ધાઃ
var વર્ણાશ્રમાદિનિયમસ્થિરસૂત્રબન્ધા
ભક્ત્યા યથાર્હ વિનિવેશિતપત્રપુષ્પા ।
માલેવ કાલવિહિતા હૃદયઙ્ગમા ત્વાં
આમોદયત્યનુપરાગધિયાં સપર્યા ॥ ૩૩॥

બ્રહ્મા ગિરીશ ઇતરેઽપ્યમરા ય એતે
નિર્ધૂય તાન્ નિરયતુલ્યફલપ્રસૂતીન્ ।
પ્રાપ્તું તવૈવ પદપદ્મયુગં પ્રતીતાઃ

પાતિવ્રતીં ત્વયિ વહન્તિ પરાવરજ્ઞાઃ ॥ ૩૪॥ var ભજન્તિ

નાથ ત્વદિષ્ટવિનિયોગવિશેષસિદ્ધં
શેષત્વસારમનપેક્ષ્ય નિજં ગુણજ્ઞાઃ । var શેષત્વસારમનુપેક્ષ્ય
ભક્તેષુ તે વરગુણાર્ણવ પારતન્ત્ર્યાત્
દાસ્યં ભજન્તિ વિપણિવ્યવહારયોગ્યમ્ ॥ ૩૫॥

સદ્ભિસ્ત્વદેકશરણૈર્નિયતં સનાથાઃ var નિયતાઃ
સર્પાદિવત્ ત્વદપરાધિષુ દૂરયાતાઃ ।
ધીરાસ્તૃણીકૃતવિરિઞ્ચપુરન્દરાદ્યાઃ
કાલં ક્ષિપન્તિ ભગવન્ કરણૈરવન્ધ્યૈઃ ॥ ૩૬॥

વાગાદિકં મનસિ તત્ પવને સ જીવે
ભૂતેષ્વયં પુનરસૌ ત્વયિ તૈઃ સમેતિ ।
સાધારણોત્ક્રમણકર્મસમાશ્રિતાનાં
યન્ત્રા મુકુન્દ ભવતૈવ યથા યમાદેઃ ॥ ૩૭॥

સવ્યાન્યયોરયનયોર્નિશિ વાસરે વા
સઙ્કુલ્પિતાયુરવધીન્ સપદિ પ્રપન્નાન્ ।
હાર્દઃ સ્વયં નિજપદે વિનિવેશયિષ્યન્
નાડીં પ્રવેશયસિ નાથ શતાધિકાં ત્વમ્ ॥૩૮॥

અર્ચિર્દિનં વિશદપક્ષ ઉદક્પ્રયાણં
સંવત્સરો મરુદશીતકરઃ શશાઙ્કઃ ।
સૌદામની જલપતિર્વલજિત્પ્રજેશઃ
ઇત્યાતિવાહિક્ સખો નયસિ સ્વકીયાન્ ॥ ૩૯॥

ત્વચ્છેષવૃત્ત્યનુગુણૈર્મહિતૈર્ગુણૌઘૈઃ var સહિતે ગુણૌઘૈઃ, સહિતૈર્ગુણૌઘૈઃ
આવિર્ભવત્યયુતસિદ્ધ નિજસ્વરૂપે ।
ત્વલ્લક્ષણેષુ નિયતેષ્વપિ ભોગમાત્રે
સામ્યં ભજન્તિ પરમં ભવતા વિમુક્તાઃ ॥ ૪૦॥

ઇત્થં ત્વદેકશરણૈરનઘૈરવાપ્યે
ત્વત્કિઙ્કરત્વવિભવે સ્પૃહયાઽપરાધ્યન્ ।
આત્મા મમેતિ ભગવન્ ભવતૈવ ગીતા var (to next line) ગીતાન્ પ્રાચો નિરીક્ષ્ય, ગીતાઃ પ્રાચો નિરીક્ષ્ય
વાચો નિરીક્ષ્ય ભરણીય ઇહ ત્વયાઽહમ્ ॥ ૪૧॥ var ઇતિ

પદ્મા મહ્ પ્રભૃતિભિઃ પરિભુક્તભૂમ્નઃ
કા હાનિરત્ર મયિ ભોક્તરિ તે ભવિત્રી ।
દુષ્યેત્ કિમઙ્ઘ્રિતટિની તવ દેવ સેવ્યા
દુર્વારતર્ષચપલેન શુનાऽવલીઢા ॥ ૪૨ ॥

સત્વાનિ નાથ વિવિધાન્યભિસઞ્જિઘૃક્ષોઃ var વિવિધાન્યપિ સઞ્જિઘૃક્ષોઃ
સંસારનાટ્યરસિકસ્ય તવાऽસ્તુ તૃપ્ત્યૈ ।
પ્રત્યક્પરાઙ્મુખમતેરસમીક્ષ્ય કર્તુઃ
પ્રાચીનસજ્જનવિડમ્બનભૂમિકા મે ॥ ૪૩ ॥

કર્તવ્યમિત્યનુકલં કલયામ્યકૃત્યં
સ્વામિન્નકૃત્યમિતિ કૃત્યમપિ ત્યજામિ । var સ્વામિન્નકૃત્યમિવ
અન્યદ્વ્યતિક્રમણજાતમનન્તમર્થ-
સ્થાને દયા ભવતુ તે મયિ સાર્વભૌમી ॥ ૪૪ ॥ var વહતુ

યં પૂર્વમાશ્રિતજનેષુ ભવાન્ યથાવત્
ધર્મં પરં પ્રણિજગૌ સ્વયમાનૃશંસ્યમ્ ।
સંસ્મારિતસ્ત્વમસિ તસ્ય શરણ્યભાવાત્
નાથ ત્વદાત્તસમયા નનુ માદૃશાર્થમ્ ॥ ૪૫ ॥

ત્રાણં ભવેતિ સકૃદુક્તિસમુદ્યતાનાં
તૈસ્તૈરસહ્યવૃજિનૈરુદરંભરિસ્તે ।
સત્યાપિતા શતમખાત્મજશઙ્કરાદૌ
નાથ ક્ષમા ન ખલુ જન્તુષુ મદ્વિવર્જમ્ ॥ ૪૬ ॥

કર્માદિષુ ત્રિષુ કથાં કથમપ્યજાનન્ var કથમિત્યજાનન્
કામાદિમેદુરતયા કલુષપ્રવૃત્તિઃ । var કામાદિમાંસલતયા
સાકેતસંભવચરાચરજન્તુનીત્યા var જન્તુરીત્યા
વીક્ષ્યઃ પ્રભો વિષયવાસિતયાऽપ્યહં તે ॥ ૪૭ ॥

બ્રહ્માણ્ડલક્ષશતકોટિગણાનનન્તાન્
એકક્ષણે વિપરિવર્ત્ય વિલજ્જમાનામ્ ।
મત્પાપરાશિમથને મધુદર્પહન્ત્રીં
શક્તિં નિયુઙ્ક્ષ્વ શરણાગતવત્સલ ત્વમ્ ॥ ૪૮ ॥

આસ્તાં પ્રપત્તિરિહ દેશિકસાક્ષિકા મે var સાક્ષિકં
સિદ્ધા તદુક્તિરનઘા ત્વદપેક્ષિતાર્થા । var ત્વદવેક્ષિતાર્થા

ન્યસ્તસ્ય પૂર્વનિપુણૈસ્ત્વયિ નન્વિદાનીં
પૂર્ણે મુકુન્દ પુનરુક્ત ઉપાય એષઃ ॥ ૪૯॥ var પૂર્ણો

યદ્વા મદર્થપરિચિન્તનયા તવાલં var તવાહં
સંજ્ઞાં પ્રપન્ન ઇતિ સાહસિકો બિભર્મિ ।
એવં સ્થિતે ત્વદપવાદનિવૃત્તયે માં
પાત્રીકુરુષ્વ ભગવન્ ભવતઃ કૃપાયાઃ ॥ ૫૦॥ var પાત્રં કુરુષ્વ

ત્યાગે ગુણેશશરણાગતસંજ્ઞિનો મે
સ્ત્યાનાગસોઽપિ સહસૈવ પરિગ્રહે વા ।
કિં નામ કુત્ર ભવતીતિ કૃપાદિભિસ્તે
ગૂઢં નિરૂપય ગુણેતર તારતમ્યમ્ ॥ ૫૧॥ var વિચારય

સ્વામી દયાજલનિધિર્મધુરઃ ક્ષમાવાન્
શીલાધિકઃ શ્રિતવશઃ શુચિરત્યુદારઃ ।
એતાનિ હાતુમનઘો ન કિલાર્હસિ ત્વં
વિખ્યાતિમન્તિ બિરુદાનિ મયા સહૈવ ॥ ૫૨॥ var વિખ્યાતધીરબિરુદાનિ

વેલા ધનઞ્જયરથાદિષુ વાચિકૈઃ સ્વૈઃ
આઘોષિતામખિલજન્તુ શરણ્યતાં તે । var અખિલલોક
જાનન્ દશાનનશતાધિકાગસોઽપિ
પશ્યામિ દત્તમભયં સ્વકૃતે ત્વયા મે ॥ ૫૩॥

રક્ષ્યસ્ત્વયા તવ ભરોઽસ્મ્યહમિત્યપૂર્વાન્
વર્ણાનિમાનહૃદયાનપિ વાચયિત્વા ।
મદ્દોષનિર્જિતગુણો મહિષીસમક્ષં
મા ભૂસ્ત્વદન્ય ઇવ મોઘપરિશ્રમસ્ત્વમ્ ॥ ૫૪॥ var મા ભૂસ્તદન્ય

મુખ્યં ચ યત્પ્રપદનં સ્વયમેવ સાધ્યં
દાતવ્યમીશ કૃપયા તદપિ ત્વયૈવ ।
તન્મે ભવચ્ચરણસઙ્ગવતીમવસ્થાં
પશ્યન્નુપાયફલયોરુચિતં વિધેયાઃ ॥ ૫૫॥

અલ્પાસ્થિરૈરસુખજૈરસુખાવસાનૈઃ
દુઃખાન્વિતૈરનુચિતૈરભિમાનમૂલૈઃ ।
પ્રત્યક્પરાગનુભવૈઃ પરિઘૂર્ણિતં માં
ત્વય્યેવ નાથ ચરિતાર્થય નિર્વિવિક્ષુમ્ ॥ ૫૬॥ var નિર્વ્યપેક્ષં, નિર્વિપક્ષં, નિર્વિવક્ષન્

તત્ત્વાવબોધશમિતપ્રતિકૂલવૃત્તિં
કૈઙ્કર્યલબ્ધકરણત્રયસામરસ્યમ્ ।
કૃત્વા ત્વદન્યવિમુખં કૃપયા સ્વયં માં
સ્ફાતિં દૃશોઃ પ્રતિલભસ્વ જગજ્જનન્યાઃ ॥ ૫૭॥

ઇત્થં સ્તુતિપ્રભૃતયો યદિ સંમતા સ્યુઃ
યદ્વાપરાધપદવીષ્વભિસંવિશન્તિ । var પદવીષ્વપિ સંવિશન્તિ
સ્તોકાનુકૂલ્યકણિકા વશવર્તિનસ્તે
પ્રીતિક્ષમાપ્રસરયોરહમસ્મિ લક્ષ્યમ્ ॥ ૫૮॥

સ્નેહોપપન્ન વિષયઃ સ્વદશાવિશેષાત્
ભૂયસ્તમિસ્રશમનીં ભુવિ વેઙ્કટેશઃ ।
દિવ્યાં સ્તુતિં નિરમિમીત સતાં નિયોગાત્
દીપપ્રકાશશરણાગતિદીપિકાખ્યામ્ ॥ ૫૯॥

The following additional shlOka is found in some publications.
(એતદનન્તરં "એતાં દીપરકાશ" ઇત્યયં શ્લોકઃ કેષુચિન્મુદ્રિતેષુ
પુસ્તકેષુ દૃશ્યતે ।
સ તુ ન શ્રીમદાચાર્યાનુગૃહીત ઇતિ સામ્પ્રદાયિકાઃ ।)

એતાં દીપપ્રકાશસ્તુતિમિહ રુચિરામિત્થમભ્યસ્યમાનઃ
સમ્યક્ દૃષ્ટ્વા શરણ્યપ્રભૃતિ નિગતિતં ન્યાસવિદ્યાખ્યતત્ત્વમ્ ।
પ્રત્યાસીદદ્વિમુક્તાનુભફલસમુદ્ભેદલબ્દ્ધ્યા કૃતાર્થઃ
પ્રાપ્ત પિણ્ડસ્ય ભેદે પરિણમતિ પરબ્રહ્મ સબ્રહ્મચારી ॥

॥ ઇતિ શ્રીશરણાગતિ દીપિકા સમાપ્તા ॥

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

This is a very important stotra in several respects. As its very name indicates it is a treatise on zaraNAgati (surrender), to establish the soundness and efficacy of which as an unfailing and immediate upAya (means) for the attainment of mokSha, vedAnta deshika is said to have come into this world. This sampradAyam (traditional faith) in which zaraNAgati is held in high esteem is referred to in the very first shloka as the "highly venerated sampradAyam

that emerged from the mahAnasa (kitchen) of yatirAja (AchArya rAmAnuja) We are also told that this sampradAyam is being presented here in the form of a hymn in praise of Lord dIpaprakAza (Vilakkoli in Tamil). The name of the kShetra is himavanam (Tan-kaa in Tamil) meaning a cool grove. This is vedAnta deshika's birthplace, the actual spot being known as Toopul near here. No wonder this stotram is a fine garland of praise in respect of the Lord of his birthplace in addition to being a compendium on the theory and practice of zaraNAgati.

lakShmI is referred to in the first five shlokas, the idea being that She is part of Divinity or the Supreme Being. In fact, shloka 469 tells us that the Lord is the dIpa (lamp) but lakShmI is its lustre. lakShmI has to be resorted to first in zaraNAgati (vAlmIki rAmAyaNam ayodhyA khaNDam and rAmAnuja's zaraNAgati gadyam)

That zaraNAgati has its roots in the upaniShads is made known to us by shloka 475 which is almost a reproduction of the mantra of shvetAshvatara upaniShad (VI-18) ending with the words "mumukShur—vai—zaraNam—ahaM—prapadye'. shlokas 476 to 506 deal with the doctrine of prapatti, how it differs from bhakti yoga, its angas or essential prerequisites, how to observe or perform prapatti, what must be the conduct of a prapanna in the post-prapatti period, and so on. This part of the stotra can well be said to be a recapitulation in verse of several chapters of shrImad rahasyatraya sAra – vedAnta deshika's magnum opus on zaraNAgati-zAstra in maNipravAla prose, interspersed with sanskrit shlokas and Tamil verses.

From shloka 507 to the end it is fervid devotion finding expression in eloquent verse and elegant argumentation, and moving appeals for help. This part must be studied and restudied by every Prapanna.

shloka 523 holds out a reward to the Lord Himself. If He protects us, He will be the recipient of lakShmI-devI's loving and approving kaTAkShas (glances).

Encoded and proofread by Pallasena Narayanaswami ppnswami at gmail.com

*sharaNAgati dIpikA*

pdf was typeset on August 17, 2024

Please send corrections to *sanskrit@cheerful.com*